श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - २८

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः
श्रीमते कृष्णाय परब्रह्मणे नमः
श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - २८

*अमृतमथने कालकूटाद्युत्पत्तिवर्णनं,*
*लक्ष्मीस्वयंवरवर्णनं अमृतोत्पत्तिवर्णनम् च*

गरलं तरलानलं पुरस्ता-
  ज्जलधेरुद्विजगाल कालकूटम्।
अमरस्तुतिवादमोदनिघ्नो
  गिरिशस्तन्निपपौ भवत्प्रियार्थम्॥ १ ॥

विमथत्सु सुरासुरेषु जाता
  सुरभिस्तामृषिषु न्यधास्त्रिधामन्।
हयरत्नमभूदथेभरत्नं
  द्युतरुश्चाप्सरसः सुरेषु तानि॥ २ ॥

जगदीश भवत्परा तदानीं
  कमनीया कमला बभूव देवी।
अमलामवलोक्य यां विलोलः
  सकलोऽपि स्पृहयाम्बभूव लोकः॥ ३ ॥

त्वयि दत्तहृदे तदैव देव्यै
  त्रिदशेन्द्रो मणिपीठिकां व्यतारीत्।
सकलोपहृताभिषेचनीयैः
  ऋषयस्तां श्रुतिगीर्भिरभ्यषिञ्चन्॥ ४ ॥

अभिषेकजलानुपातिमुग्ध-
  त्वदपाङ्गैरवभूषिताङ्गवल्लीम्।

www.prapatti.com

मणिकुण्डलपीतचेलहार-
    प्रमुखैस्तामभरादयोऽन्वभूषन्॥ ५ ॥

वरणस्रजमात्तभृङ्गनादां
    दधती सा कुचकुम्भमन्दयाना।
पदशिञ्जितमञ्जुनूपुरा त्वां
    कलितव्रीलविलासमाससाद॥ ६ ॥

गिरिश द्रुहिणादिसर्वदेवान्
    गुणभाजोऽप्यविमुक्तदोषलेशान्।
अवमृश्य सदैव सर्वरम्ये
    निहिता त्वय्यनयाऽपि दिव्यमाला॥ ७ ॥

उरसा तरसा ममानिथैनां
    भुवनानां जननीमनन्यभावाम्।
त्वदुरोविलसत्तदीक्षणश्री-
    परिवृष्ट्या परिपुष्टमास विश्वम्॥ ८ ॥

अतिमोहनविभ्रमा तदानीं
    मदयन्ती खलु वारुणी निरागात्।
तमसः पदवीमदास्त्वमेना-
    मतिसम्माननया महासुरेभ्यः॥ ९ ॥

तरुणाम्बुदसुन्दरस्तदा त्वं
    ननु धन्वन्तरिरुत्थितोऽम्बुराशेः।
अमृतं कलशे वहन् कराभ्या-
    मखिलार्तिं हर मारुतालयेश॥ १० ॥

**********